# .. ha.nsagItA ..

# ॥ હંસગીતા ॥

## Document Information

Text title : hansagItA
File name : hansagiitaa.itx
Category : gItA
Location : doc_giitaa
Language : Sanskrit
Subject : religion in critical edition, 289 in Kinjawadekar edition.
Transliterated by : Professor Tokunaga in Kyoto system(?)
Proofread by : Sunder Hattangadi(sunderh at hotmail.com) and PSA Easwaran psaeaswaran at gmail.com
Description-comments : mahAbhArata shAntiparva mokShadharmaparva adhyAyaH 288
Latest update : June 2, 1998 , May 12, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ હંસગીતા ॥

યુધિષ્ઠિર ઉવાચ ।
સત્યં દમં ક્ષમાં પ્રજ્ઞાં પ્રશંસન્તિ પિતામહ ।
વિદ્વાંસો મનુજા લોકે કથમેતન્મતં તવ ॥ ૧॥

ભીષ્મ ઉવાચ ।
અત્ર તે વર્તયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
સાધ્યાનામિહ સંવાદં હંસસ્ય ચ યુધિષ્ઠિર ॥ ૨॥

હંસો ભૂત્વાથ સૌવર્ણસ્ત્વજો નિત્યઃ પ્રજાપતિઃ ।
સ વૈ પર્યેતિ લોકાંસ્ત્રીનથ સાધ્યાનુપાગમત્ ॥ ૩ ॥

સાધ્યા ઊચુઃ ।
શકુને વયં સ્મ દેવા વૈ સાધ્યાસ્ત્વામનુયુઞ્જ્મહે ।
પૃચ્છામસ્ત્વાં મોક્ષધર્મં ભવાંશ્ચ કિલ મોક્ષવિત્ ॥ ૪॥

શ્રુતોઽસિ નઃ પણ્ડિતો ધીરવાદી
સાધુશબ્દશ્ચરતે તે પતત્રિન્ ।
કિં મન્યસે શ્રેષ્ઠતમં દ્વિજ ત્વં
કસ્મિન્મનસ્તે રમતે મહાત્મન્ ॥ ૫॥

તન્નઃ કાર્યં પક્ષિવર પ્રશાધિ
યત્કર્મણાં મન્યસે શ્રેષ્ઠમેકમ્ ।
યત્કૃત્વા વૈ પુરુષઃ સર્વબન્ધૈર્-
વિમુચ્યતે વિહગેન્દ્રેહ શીઘ્રમ્ ॥ ૬॥

હંસ ઉવાચ ।
ઇદં કાર્યમમૃતાશાઃ શૃણોમિ
તપો દમઃ સત્યમાત્માભિગુપ્તિઃ ।
ગ્રન્થીન્ વિમુચ્ય હૃદયસ્ય સર્વાન્
પ્રિયાપ્રિયે સ્વં વશમાનયીત ॥ ૭॥

નારુન્તુદઃ સ્યાન્ન નૃશંસવાદી
ન હીનતઃ પરમભ્યાદદીત ।
યયાસ્ય વાચા પર ઉદ્વિજેત
ન તાં વદેદ્રુષતીં પાપલોક્યામ્ ॥ ૮॥

વાક્સાયકા વદનાન્નિષ્પતન્તિ
યૈરાહતઃ શોચતિ રાત્ર્યહાનિ ।

પરસ્ય નામર્મસુ તે પતન્તિ
તાન્ પણ્ડિતો નાવસૃજેત્પરેષુ ॥ ૯॥

પરશ્ચેદેનમતિ વાદબાનૈર્-
ભૃશં વિધ્યેચ્છમ એવેહ કાર્યઃ ।
સંરોષ્યમાણઃ પ્રતિહૃષ્યતે યઃ
સ આદત્તે સુકૃતં વૈ પરસ્ય ॥ ૧૦॥

ક્ષેપાભિમાનાદભિષઙ્ગવ્યલીકં var ક્ષેપાયમાણમભિષઙ્ગ
નિગૃહ્ણાતિ જ્વલિતં યશ્ચ મન્યુમ્ ।
અદુષ્ટચેતા મુદિતોઽનસૂયુઃ
સ આદત્તે સુકૃતં વૈ પરેષામ્ ॥ ૧૧॥

આક્રુશ્યમાનો ન વદામિ કિંચિત્
ક્ષમામ્યહં તાડ્યમાનશ્ચ નિત્યમ્ ।
શ્રેષ્ઠં હ્યેતત્ યત્ ક્ષમામાહુરાર્યાઃ
સત્યં તથૈવાર્જવમાનૃશંસ્યમ્ ॥ ૧૨॥

વેદસ્યોપનિષત્સત્યં સત્યસ્યોપનિષદ્દમઃ ।
દમસ્યોપનિષન્મોક્ષં એતત્સર્વાનુશાસનમ્ ॥ ૧૩ ॥

વાચો વેગં મનસઃ ક્રોધવેગં વિવિત્સા વેગમુદરોપસ્થ વેગમ્ ।
એતાન્ વેગાન્ યો વિષહદુદીર્ણાસ્તં મન્યેઽહં બ્રાહ્મણં વૈ મુનિં ચ ॥ ૧૪॥

અક્રોધનઃ ક્રુધ્યતાં વૈ વિશિષ્ટસ્તથા તિતિક્ષુરતિતિક્ષોર્વિશિષ્ટઃ ।
અમાનુષાન્માનુષો વૈ વિશિષ્ટસ્ તથા જ્ઞાનાજ્જ્ઞાનવાન્વૈ પ્રધાનઃ ॥ ૧૫॥
var જ્ઞાનવિદ્વૈ વિશિષ્ટઃ
આક્રુશ્યમાનો નાક્રોશેન્મન્યુરેવ તિતિક્ષતઃ । var નાક્રુશ્યેત્ મન્યુરેનં
આક્રોષ્ટારં નિર્દહતિ સુકૃતં ચાસ્ય વિન્દતિ ॥ ૧૬॥

યો નાત્યુક્તઃ પ્રાહ રૂક્ષં પ્રિયં વા
યો વા હતો ન પ્રતિહન્તિ ધૈર્યાત્ ।
પાપં ચ યો નેચ્છતિ તસ્ય હન્તુસ્-
તસ્મૈ દેવાઃ સ્પૃહયન્તે સદૈવ ॥ ૧૭॥ var તસ્યેહ દેવાઃ સ્પૃહયન્તિ
નિત્યમ્ ।
પાપીયસઃ ક્ષમેતૈવ શ્રેયસઃ સદૃશસ્ય ચ ।
વિમાનિતો હતોઽઽક્રુષ્ટ એવં સિદ્ધિં ગમિષ્યતિ ॥ ૧૮॥

સદાહમાર્યાન્નિભૃતોઽપ્યુપાસે
ન મે વિવિત્સા ન ચમેઽસ્તિ રોષઃ । var વિવિત્સોત્સહતે ન રોષઃ

ન ચાપ્યહં લિપ્સમાનઃ પરૈમિ
ન ચૈવ કિંચિદ્વિષયેણ યામિ ॥ ૧૯॥

નાહં શપ્તઃ પ્રતિશપામિ કિંચિદ્
દમં દ્વારં હ્યમૃતસ્યેહ વેદ્મિ ।
ગુહ્યં બ્રહ્મ તદિદં વા બ્રવીમિ
ન માનુષાચ્છ્રેષ્ઠતરં હિ કિંચિત્ ॥ ૨૦॥

વિમુચ્યમાનઃ પાપેભ્યો ઘનેભ્ય ઇવ ચન્દ્રમાઃ ।
વિરજાઃ કાલમાકાઙ્ક્ષન્ ધીરો ધૈર્યેણ સિધ્યતિ ॥ ૨૧॥

યઃ સર્વેષાં ભવતિ હ્યર્ચનીય
ઉત્સેધનસ્તમ્ભ ઇવાભિજાતઃ ।
યસ્મૈ વાચં સુપ્રશસ્તાં વદન્તિ var તસ્મૈ વાચં સુપ્રસન્નાં
સ વૈ દેવાન્ગચ્છતિ સંયતાત્મા ॥ ૨૨॥

ન તથા વક્તુમિચ્છન્તિ કલ્યાણાન્ પુરુષે ગુણાન્ ।
યથૈષાં વક્તુમિચ્છન્તિ નૈર્ગુણ્યમનુયુઞ્જકાઃ ॥ ૨૩ ॥

યસ્ય વાઙ્મનસી ગુપ્તે સમ્યક્પ્રણિહિતે સદા ।
વેદાસ્તપશ્ચ ત્યાગશ્ચ સ ઇદં સર્વમાપ્નુયાત્ ॥ ૨૪॥

આક્રોશનાવમાનાભ્યાં નાબુધાન્ ગર્હયેદ્ બુધઃ । var બોધયેદ્ બુધઃ
તસ્માન્ન વર્ધયેદન્યં ન ચાત્માનં વિહિંસયેત્ ॥ ૨૫॥

અમૃતસ્યેવ સન્તૃપ્યેદવમાનસ્ય વૈ દ્વિજઃ । var પણ્ડિતઃ ।
સુખં હ્યવમતઃ શેતે યોઽવમન્તા સ નશ્યતિ ॥ ૨૬॥

યત્ક્રોધનો યજતે યદ્દદાતિ
યદ્વા તપસ્તપ્યતિ યજ્જુહોતિ ।
વૈવસ્વતસ્તદ્ધરતેઽસ્ય સર્વં
મોઘઃ શ્રમો ભવતિ હિ ક્રોધનસ્ય ॥ ૨૭॥

ચત્વારિ યસ્ય દ્વારાણિ સુગુપ્તાન્યમરોત્તમાઃ ।
ઉપસ્થમુદરં હસ્તૌ વાક્ચતુર્થી સ ધર્મવિત્ ॥ ૨૮॥

સત્યં દમં હ્યાર્જવમાનૃશંસ્યં
ધૃતિં તિતિક્ષામભિસેવમાનઃ । var તિતિક્ષાં ચ સંસેવમાનઃ
સ્વાધ્યાયનિત્યોઽસ્પૃહયન્પરેષામ્ var યુક્તોઽસ્પૃહયન્ પરેષામ્
એકાન્તશીલ્યૂર્ધ્વગતિર્ભવેત્સઃ ॥ ૨૯॥

સર્વાનેતાનનુચરન્ વત્સવચ્ચતુરઃ સ્તનાન્ । var સર્વાંશ્ચૈનાનનુચરન્

ન પાવનતમં કિંચિત્સત્યાદધ્યગમં ક્વચિત્ ॥ ૩૦॥

આચક્ષેઽહં મનુષ્યેભ્યો દેવેભ્યઃ પ્રતિસઞ્ચરન્ ।
સત્યં સ્વર્ગસ્ય સોપાનં પારાવારસ્ય નૌરિવ ॥ ૩૧॥

યાદૃશૈઃ સંનિવસતિ યાદૃશાંશ્ચોપસેવતે ।
યાદૃગિચ્છેચ્ચ ભવિતું તાદૃગ્ભવતિ પૂરુષઃ ॥ ૩૨॥

યદિ સન્તં સેવતિ યદ્યસન્તં
તપસ્વિનં યદિ વા સ્તેનમેવ ।
વાસો યથા રઙ્ગવશં પ્રયાતિ
તથા સ તેષાં વશમભ્યુપૈતિ ॥ ૩૩॥

સદા દેવાઃ સાધુભિઃ સંવદન્તે
ન માનુષં વિષયં યાન્તિ દ્રષ્ટુમ્ ।
નેન્દુઃ સમઃ સ્યાદસમો હિ વાયુર્-
ઉચ્ચાવચં વિષયં યઃ સ વેદ ॥ ૩૪॥

અદુષ્ટં વર્તમાને તુ હૃદયાન્તરપૂરુષે ।
તેનૈવ દેવાઃ પ્રીયન્તે સતાં માર્ગસ્થિતેન વૈ ॥ ૩૫॥

શિશ્નોદરે યેઽભિરતાઃ સદૈવ var યે નિરતાઃ
સ્તેના નરા વાક્પરુષાશ્ચ નિત્યમ્ ।
અપેતદોષાનિતિ તાન્ વિદિત્વા
દૂરાદ્દેવાઃ સમ્પરિવર્જયન્તિ ॥ ૩૬॥

ન વૈ દેવા હીનસત્ત્વેન તોષ્યાઃ
સર્વાશિના દુષ્કૃતકર્મણા વા ।
સત્યવ્રતા યે તુ નરાઃ કૃતજ્ઞા
ધર્મે રતાસ્તૈઃ સહ સમ્ભજન્તે ॥ ૩૭॥

અવ્યાહૃતં વ્યાકૃતાચ્છ્રેય આહુઃ
સત્યં વદેદ્વ્યાહૃતં તદ્દ્વિતીયમ્ ।
ધર્મં વદેદ્વ્યાહૃતં તત્તૃતીયં
પ્રિયંવદેદ્વ્યાહૃતં તચ્ચતુર્થમ્ ॥ ૩૮॥

સાધ્યા ઊચુઃ ।
કેનાયમાવૃતો લોકઃ કેન વા ન પ્રકાશતે ।
કેન ત્યજતિ મિત્રાણિ કેન સ્વર્ગં ન ગચ્છતિ ॥ ૩૯॥

હંસ ઉવાચ ।

અજ્ઞાનેનાવૃતો લોકો માત્સર્યાન્ન પ્રકાશતે ।
લોભાત્ત્યજતિ મિત્રાણિ સઙ્ગાત્સ્વર્ગં ન ગચ્છતિ ॥ ૪૦॥

સાધ્યા ઊચુઃ ।
કઃ સ્વિદેકો રમતે બ્રાહ્મણાનાં
કઃ સ્વિદેકો બહુભિર્જોષમાસ્તે ।
કઃ સ્વિદેકો બલવાન્ દુર્બલોઽપિ
કઃ સ્વિદેષાં કલહં નાન્વવૈતિ ॥ ૪૧॥

હંસ ઉવાચ ।
પ્રાજ્ઞ એકો રમતે બ્રાહ્મણાનાં
પ્રાજ્ઞશ્ચૈકો બહુભિર્જોષમાસ્તે ।
પ્રાજ્ઞ એકો બલવાન્ દુર્બલોઽપિ
પ્રાજ્ઞ એષાં કલહં નાન્વવૈતિ ॥ ૪૨॥

સાધ્યા ઊચુઃ ।
કિં બ્રાહ્મણાનાં દેવત્વં કિં ચ સાધુત્વમુચ્યતે ।
અસાધુત્વં ચ કિં તેષાં કિમેષાં માનુષં મતમ્ ॥ ૪૩ ॥

હંસ ઉવાચ ।
સ્વાધ્યાય એષાં દેવત્વં વ્રતં સાધુત્વમુચ્યતે ।
અસાધુત્વં પરીવાદો મૃત્યુર્માનુષ્યમુચ્યતે ॥ ૪૪॥

ભીષ્મ ઉવાચ ।
સંવાદ ઇત્યયં શ્રેષ્ઠઃ સાધ્યાનાં પરિકીર્તિતઃ ।
ક્ષેત્રં વૈ કર્મણાં યોનિઃ સદ્ભાવઃ સત્યમુચ્યતે ॥ ૪૫॥

var
ઇત્યુક્ત્વા પરમો દેવ ભગવાન્ નિત્ય અવ્યયઃ ।
સાધ્યૈર્દેવગણૈઃ સાર્ધં દિવમેવારુરોહ સઃ ॥ ૪૫॥

એતદ્ યશસ્યમાયુષ્યં પુણ્યં સ્વર્ગ્યાય ચ ધ્રુવમ્ ।
દર્શિતં દેવદેવેન પરમેણાવ્યયેન ચ ॥ ૪૬॥

॥ ઇતિ શ્રીમહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
હંસગીતા સમાપ્તા ॥

mahAbhArata shAntiparva mokShadharmaparva adhyAyaH 288 in critical edition, 289 in Kinjavadekar edition.

Proofread by Sunder Hattangadi sunderh@hotmail.com

and PSA Easwaran psaeaswaran at gmail.com

.. ha.nsagItA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*